शब्दविमर्शः - रप्रत्ययान्तशब्दानामवलोकनम्।

5. कम्रा।

भट्टिकाव्ये रामप्रवासो नाम्नि चतुर्थे सर्गे सर्वानर्थहेतू रावणभगिनी ताटका लक्ष्मणमुपेत्य 'सौमित्रे मामुपायंस्थाः कम्रामिच्छुर्वशंवदाम्। त्वद्भोगीनां सहचरीमशङ्कः पुरुषायुषम्।।' (4.20) इत्युवाच। हे सौमित्रे। इच्छुरेषणशीलः। अशङ्कः निर्विकल्पः सन्। मामुपायँस्थाः परिणय। कम्राम् कामिनीम्। वशंवदाम्। अहं ते वश्येति वदन्तीम्। त्वद्भोगीनां त्वच्छरीराय हिताम्। अवैधव्यादिलक्षणयोगात्। सहचरीम् सहगामिनीम्। कियन्तं कालमित्युक्तौ पुरुषायुषं पुरुषस्यायुर्यावत्। कम्रशब्दः कमु कान्तौ (भ्वा.444) इत्यस्माद्धातोः 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (3.2.167) इति रप्रत्ययान्तः। 'कामुके कमितानुकः। कम्रः कामयिताभीकः कमनः कामनोऽभिकः' इत्यमरः।

एवं 'लोलां दृष्टिमितस्ततो वितनुते सभ्रूलताविभ्रमामाभुग्नेन विवर्त्तिता बलिमता मध्येन कम्रस्तनी।' इति शाकुन्तले (1.26)। कमनीयार्थे कम्रशब्दः। कम्रौ मनोहरौ स्तनौ कुचौ यस्याः तादृशी शकुन्तलेति शेषः।

***

6. हिंस्रः।

अपि वाचा व्याहर्तुं शक्यते लक्ष्मणस्य दुरवस्था। सत्यशीलं भ्रातरि भक्तिमन्तं भ्रातृजायायां मातृवद्वर्त्तमानं सर्वमप्यात्मसुखं रामाय परित्यन्तं स्वीयैरतुल्यवृत्तैरात्मानं मानिनामग्रे स्थापयन्तमपि तं सीता निर्भर्त्स्य रामस्यान्तिकं प्रेषयति। दूयमानमनोवृत्तिरिति ज्ञात्वापि भर्तुस्तं भ्रातरं न किञ्चिदुवाच सा। नाप्याश्वासयामास। सीतापि उद्विग्नमानसा खलु बभूव। कार्यद्वयाकुलोऽभूल्लक्ष्मणः। किं तत्कार्यद्वयम्। तद्धस्तयोः न्यासभूता मैथिली। तां परित्यज्य न कुत्रापि गन्तव्यमिति रामेणादिष्टः। तद्यदिदानीं मारीचेन कृतं रामस्येव सदृशं क्रन्दितं श्रुत्वा सीतया रामान्वेषणार्थमादिष्टस्तथा कुर्यात्तर्हि रामस्याज्ञोल्लङ्घनन्नामापराधो दुस्तरः। यदि न कुर्यात्सीतावचस्तर्हि लक्ष्मणे संक्रुद्धाया रामविषये व्यथितायाः सीताया सान्त्वं नाम कृच्छ्रं कर्म।

आपदग्रस्तो जनः अनियतमाचरति। सत्वाननुकूलञ्च। यथा रघुवंशे 'अपथे पथमर्पयन्ति श्रुतवन्तो हि रजोनिमीलिताः'। इह तावद् रामः लक्ष्मणवचोऽनुस्मरति मारीचमारणानन्तरम्। किं तद्वचः। 'मायैषा राक्षसस्येति'। किन्तु अनुपदमेव लक्ष्मणं सीतया रहितमागच्छन्तमालक्ष्य भर्त्सयामास। सीतयापि तर्जितः। नैतेन मन्तव्यं सीता लक्ष्मणं हृदयेन निनिन्देति। दैवतं हि पतिः स्त्रीणाम्। भर्तरि व्यसनग्रस्ते सोढुमशक्या एवं प्रालपत्। अत एवान्यत्रानुपदमेव लक्ष्मणगुणान् वर्णयति रावणाय। 'एतद् ब्राह्मण रामस्य व्रतं धृतमनुत्तमम्। तस्य भ्राता तु वैमात्रो लक्ष्मणो नाम वीर्यवान्। रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा। स भ्राता लक्ष्मणो नाम ब्रह्मचारी दृढव्रतः। अन्वगच्छद् धनुष्पाणिः प्रव्रजन्तं मया सह।' इत्यादि (3.47.18,19)। नैतेन सीता सामान्यस्त्रीवदाचरतीति मन्तव्यम्। भर्तारं सर्वात्मना शरणं प्रपन्नानां कुलस्त्रीणां पतिदेवतानामिदं चरितम्। नैतत्स्त्रीसामान्यम्। प्रायशो योषितः विषमस्थं जहति समस्थञ्चानुरज्यन्ते। भर्तरि पुत्रे भ्रातरि च स्त्रीणामयं स्वभावो लोकदृष्टः। तदुक्तमगस्त्येन रामायणे 'एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन। समस्थमनुरज्यन्ते विषमस्थं त्यजन्ति च।।' इति (13.5.अरण्यकाण्डम्)। किन्त्वस्यापवादः सीतेत्यनुपदमेवाब्रवीन्महात्मा अगस्त्यः। 'इयञ्च भवतो भार्या दोषैरेतैर्विवर्जिता। श्लाघ्या च व्यपदेश्या च यथा देवीष्वरुन्धती।।' इति। (13.7.अरण्यकाण्डम्)। अत एवोत्तरकाण्डे 'यच्च ते वचनीयं स्यादपवादः समुत्थितः। मया च परिहर्तव्यं त्वं हि मे परमा गतिरिति (49.13)।' यद्यपि पूर्वप्रसङ्गे सीता लक्ष्मणं कठोरैः वाक्यैः निनिन्द। ततः पश्चात् रावणेनापहृता तमेव लक्ष्मणमनुक्रोशति रक्षणार्थं 'हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक। ह्रियमाणां न जानीषे रक्षसा कामरूपिणा। (3.49.24)।' एवमन्यत्रापि 'पतिं स्मरन्ती दयितञ्च देवरम्' इति (3.46.36)। अपरत्र तमेवाभिभाषते मुखदर्शनाय। रामे स्थिते यन्न कृतं तद्रामस्याभावे नितरान्न करिष्य इति स प्रत्यवादीत्। यथा 'निरीक्ष्य माद्य गच्छ त्वमृतुकालातिवर्तिनीम्। एवं ब्रुवन्त्यां सीतायां लक्ष्मणो दीनचेतनः। ध्यात्वा मुहूर्तं तामाह किं मां वक्ष्यसि शोभने। दृष्टपूर्वं न ते रूपं पादौ दृष्टौ तवानघे (उत्तरकाण्डः 45.19-21)। कथमत्र हि पश्यामि रामेण रहितां वने' इत्यादि। अलं तावदतिप्रपञ्चनेन। रप्रत्ययान्तोऽन्यः शब्द उदाहर्तव्यः।

रघुवंशस्य प्रथमे सर्गे प्रजालोपनिमीलितो दिलीपः सुदक्षिणान्वितः वसिष्ठस्याश्रमं ययौ। ततः नन्दिनीवरप्रसादो नाम द्वितीयः सर्गः। नन्दिनीशुश्रूषणतत्परं दिलीपं परीक्षितुं सा निश्चकार। तत्र प्रसङ्गे 'तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि। ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः।।' (2.62) विस्मितमाश्चर्यं गतम्। तं दिलीपं धेनुरुवाच किमुवाचेत्याह - हे साधो मया मायामुद्भाव्य परीक्षितोऽसि।

ऋषिप्रभावान्मय्यन्तकोऽपि प्रहर्तुं न प्रभुर्न समर्थः। अन्ये हिंस्राः घातुकाः किमुत। न कदाचिदपि प्रहर्तुं शक्ता इति भावः। अत्र हिंस्राः नाम घातुकाः हिंसाशीला इत्यर्थः। 'शरारुर्घातुको हिंस्रः' इत्यमरः। तृहि हिसि हिंसायाम् (रुधा.18,19) इत्यस्मात् 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (3.2.167) इति रप्रत्ययः।

भट्टिकाव्यस्य श्रीरामसम्भवनाम्नि प्रथमे सर्गे 'आशीर्भिरभ्यर्च्य मुनिः क्षितीन्द्रं प्रीतः प्रतस्थे पुनराश्रमाय। तं पृष्ठतः प्रष्ठमियाय नम्रो हिंस्रेषु दीप्राप्तधनुः कुमारः।।' (1.24)। रामगमनस्यानुज्ञातत्वात् प्रीतो मुनिः क्षितीन्द्रं राजानमाशीर्भिरभ्यर्च्य पूजयित्वा आश्रमं पुनः प्रस्थितवान्। प्रष्ठम् = अग्रयायिनं तम्। पृष्ठतः = पश्चात् इयाय कुमारः। कीदृशोऽसावित्याह नम्रोऽनुकूलः। हिंसनशीला इषवः शराः हिंस्रेषवः। आप्तमविसंवादि यद्धनुस्तत्। हिंस्रेषु दीप्तमाप्तं धनुर्यस्य कुमारस्येत्यर्थः। दीप्रमस्त्रं धृष्टतया यस्य धनुषस्तद्दीप्रास्त्रं धनुर्यस्येति सः। कस्मिन्विषय इति चेत्। हिंस्रेषु नान्येषु। नम्रादयो 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' (3.2.167) इति रप्रत्ययान्ताः। किं नम्रादय इत्यत्रादिशब्दः प्रयुज्यते। श्लोकस्थानामितरेषामपि रप्रत्ययान्तानां सङ्ग्रहो यथा स्यादित्येवमर्थः यथा दीप्रशब्दः। तद्विषय अग्रे वक्ष्यते। अये नम्रशब्दोऽपि रप्रत्ययान्त इव। सत्यम्। प्रबन्धस्यारम्भ एव नम्रशब्दो वर्णितः।

***